# विभक्तिः

१२ – ०२.०१.२०१६

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- विभक्तिः – किम्?
- विभक्तिः – कति?
- विभक्तिः – काः?
- विभक्तिः – किमर्थम्?

# पुनरावर्तनम्

- प्रथमाविभक्तिः
  - वस्तुनिर्देशे। सः वृक्षः। एषः बालः।
  - कर्तरि। बालः पठति। सीता गायति।
  - कर्मणि। पाठः पठनीयः। शाला गन्तव्या।
- द्वितीयाविभक्तिः
  - कर्मणि। पाठं पठति। गृहं गच्छति।
  - द्विकर्मकाः। गुरुं प्रश्नं पृच्छति। स्यूतं शालां नयति।
  - उपपदद्वितीया। ग्रामं परितः वनम् अस्ति।

# पुनरावर्तनम्

- तृतीयाविभक्तिः
  - करणे। हस्तेन खादति। नासिकया जिघ्रति।
  - भाववाचकेभ्यः। कोपेन वदति। संशयेन पश्यति।
  - कर्तरि। बालेन खादितम्। मया उक्तम्।
- तृतीयाविभक्तिरूपाणि
  - बालेन बालाभ्याम् बालैः
  - बालिकया बालिकाभ्याम् बालिकाभिः
  - नार्या नारीभ्याम् नारीभिः
  - मित्रेण मित्राभ्याम् मित्रैः

# उपपदतृतीया - सह

- रामेण सह सीता वनं गतवती।
- कृष्णेन साकं अर्जुनः युद्धाय प्रस्थितवान्।
- दुर्योधनेन सार्धं कर्णः आगतवान्।
- द्रौपद्या समं सर्वे पाण्डवाः उपस्थिताः।
- अहमपि त्वया आगच्छामि।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः-१ (केन सह गच्छति)

शाला

जनकः

वैद्यशाला पितामही

जननी देवालयः

क्षेत्राणि पितामहः

बालकः

अग्रजाः आपणः

ग्रामः मातुलः

अनुजा सङ्गीतकक्ष्या

मित्राणि

क्रीडाङ्गणम्

# अभ्यासः - २

- बालः-मित्राणि-क्रीड्
- बालिका-सख्यः-पठ्
- कृष्णः-गोप्यः-नृत्
- गोपाः-कृष्णः-नन्द्
- पाण्डवाः-द्रौपदी-गम्
- द्रौपदी-पाण्डवाः-आगम्
- नायकाः-अनुचराः-अट्
- गजः-हस्तिपकः-सञ्चर्
- माता-पुत्री-गाय्
- राजा-योधाः-युध्
- गुरुः-शिष्याः-उपविश्
- अमात्याः-महाराजः-चर्च्

# सर्वनाम्नां तृतीयाविभक्तिः

| | | |
|---|---|---|
| सः - तेन | ताभ्याम् | तैः |
| सा – तया | ताभ्याम् | ताभिः |
| तत् – तेन | ताभ्याम् | तैः |
| एषः – एतेन | एताभ्याम् | एतैः |
| एषा – एतया | एताभ्याम् | एताभिः |
| एतत् – एतेन | एताभ्याम् | एतैः |
| अहम् – मया | आवाभ्याम् | अस्माभिः |
| त्वम् - त्वया | युवाभ्याम् | युष्माभिः |

# अभ्यासः - ३

गम्

सः

नृत् त्वम् सा आगम्

गाय् अहम् बालकः तत् पठ्

उपविश् एतत् एषः लिख्

एषा

क्रीड्

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# उपपदतृतीया - विना

- तेन विना तृणमपि न चलति।
- जलेन विना मीनाः न जीवन्ति।
- अहं त्वया विना न गच्छामि।

# अभ्यासः - ४

- आहारः
- दया
- मित्राणि
- नदी
- बालाः
- पुत्री
- कथाः
- संस्कृतम्

विना

वयं न जीवामः
धर्मः नास्ति
जीवनं दुष्करम्
कृषिकार्यं न चलति
गृहं न शोभते
माता आपणं न गच्छति
मम पुत्री न निद्राति
संस्कृतिः नश्यति

# उपपदतृतीया - अलम्

- अलं कलहेन।
- अलं कोलाहलेन।
- अलं निद्रया।

# अभ्यासः - ५

अलम्

अहङ्कारः

दुराशा

दुःखम्

विस्तरः

भीतिः

लज्जा

जल्पनम्

क्रोधः

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# तृतीयाविभक्तिः - विशिष्टप्रयोगाः

- **मासेन** अधीते। **वर्षेण** लभते।
- **जटाभिः** तापसः। **समवस्त्रेण** च्छात्रः।
- **अक्ष्णा** काणः। **पादेन** खञ्जः।

# तृतीयाविभक्तिः – सङ्क्षेपः

- करणवाचकानां तृतीया।
- भाववाचकानां तृतीया।
- कर्तृवाचकानां तृतीया।
- उपपदतृतीया – सह, विना, अलम्।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |